# First Terminal Evaluation - 2017
## First Language Part - I Sanskrit - Paper I

## SANSKRIT

(For Academic & Oriental Sanskrit Schools)

**STD - X** | **Time - 1½ Hours**

**Total Score - 40**

---

निर्देशाः -

* १५ निमेषाः समाश्वासकालः। प्रश्नान् पठितुम् उत्तराणि क्रमीकर्तुं च अयं कालः उपयोक्तव्यः।
* प्रश्नान् निर्देशान् च सम्यक् अवगम्य एव उत्तराणि लेखनीयानि।
* उत्तरलेखने मूल्याङ्काः कालः च परिगणनीयाः।
* विवर्तनप्रश्नात् ऋते सर्वेषां प्रश्नानाम् उत्तरलेखने देवनागरीलिपिः उपयोक्तव्या।

---

**I .कोष्ठकात् चतुर्णां समुचितमुत्तरं निर्धार्य लिखत।** (4x1=4)

क. अश्विनीसुतौ कौ ? ( सुखःदुखे , देववैद्यौ, आयुरारोग्ये)

ख. " जननी " इत्यस्य समानपदं किम्? (दीना, नन्दिनी, माता)

ग. सुखदुःखयोः कर्ता कः ? (आत्मा, मनः, वाक्)

घ. दशपुत्रसमो . . . . . . . . . . . . . . . . । (मित्रः, द्रुमः, ह्रदः)

ङ. " स्वराज्यम् अस्माकं जन्माधिकार एव " कस्य वचनमिदम्?

( बालगङ्गाधरतिलकस्य, डा. एस्. राधाकृष्णस्य, महात्मागान्धिनः)

**II. यथोचितं योजयत ।** (4x1=4)

क. चरकसंहिता - महाभारतम्

ख. सुरभिः - वृक्षः

ग. भगवद्गीता - धेनोः माता

घ. आम्रः - चरकः

**III. उदाहरणानानुसारं विग्रहवाक्यं लिखत ।** **(1x1=1)**

**उदा** - देही - देहम् अस्य अस्तीति ।धनी- . . . . . . . . . . . . . . ।

**IV.शतृ-शानजन्तरूपाणि विविच्य लिखत ।** **(3x1=3)**

( नुद्यमानः ,पीडयन्, ताडयन्, कम्पमानः,पचमानः , लिखन् )

**V-VI एतयोः <u>एकस्य</u> उत्तरं लिखत ।** **(1x 4=4)**

**V. सस्यप्रभेदान् अधिकृत्य सूचनानुसारं लघूपन्यासं लिखत ।**

**सूचनाः-** सुरपालः -- वृक्षायुर्वेदः -- त्रयोदशाध्यायः -- तरुमहिमा -- बीजोत्पादनविधिः -- सस्यानां पोषणम् -- वृक्षः -- वनस्पतिः - वीरुत् -- ओषधिः ।

**VI सूचनाः उपयुज्य के .आर् .नारायणस्य जीवनचरितं लिखत ।**

| | | |
|---|---|---|
| नाम | : | कोच्चेरिल् रामन् नारायणन् । |
| जन्म | : | १९२० अक्तूबर् १७ । |
| जन्मदेशः | : | उषवूर्, कोट्टयम् । |
| पितरौ | : | कोच्चेरिल् रामन् वैद्यः,पाप्पियम्मा च । |
| प्रशस्तिः | : | भारतस्य दशमः राष्ट्रपतिः । |
| मृत्युः | : | २००५ नवम्बर् ९ । |

**VII <u>त्रयाणाम्</u> औषधसस्यानां गुणान् लिखत।** **(3x1=3)**

क) आमलकी
ख) हरिद्रा
ग) तुलसी
घ) निम्बः

**VIII. अधोदत्तवाक्यात् सम्बोधनरूपं चित्वा लिखत।** **(1x1=1)**

देवेन्द्रः ताम् एवम् असान्त्वयत् - " गच्छ वत्से! सर्वं भद्रं जायेत " इति ।

IX "अपरेषां कृते प्रयोजनरहितं जन्म निरर्थकम्"-इति आशययुक्तं श्लोकं चित्वा लिखत । (2x1=2)

क) स हि जातु गुरोः कुले वसन्
सवयोभिः सह भैक्ष्यलिप्सया ।
भगवान् भवनं द्विजन्मनो
धनहीनस्य विवेश कस्यचित् ।।

ख) विधिना खलु वञ्चिता वयं
वितरीतुं वटवे न शक्नुमः ।
अपि भैक्ष्यमकिञ्चनत्वतो
धिगिदं जन्म निरर्थकं गतम् ।।

X श्लोकं पठित्वा सूचनानुसारम् आशयं लिखत । (1x4=4)

परिश्रमो मिताहारो
भूगतावश्विनीसुतौ
तावनादृत्य नैवाहं
वैद्यमन्यं समाश्रये ।।

**सूचनाः** - ऐतरेयब्राह्मणम् - व्यायामः - आहारमितत्वम् - देववैद्यौ - अन्यः वैद्यः - न आवश्यकम् ।

XI सस्यसंरक्षणम् इति विषये भित्तिपत्रिकां रचयत। (2x1=2)

XII पट्टिकां पूरयत । (3x1=3)

| लट् | लङ् | लोट् |
|---|---|---|
| अस्ति | ----- | अस्तु |
| पश्यति | अपश्यत् | --------- |
| ------- | अपृच्छत् | पृच्छतु |

**XIII. खण्डिकां पठित्वा प्रश्नानाम् उत्तराणि लिखत ।** ( 5x1=5)

अद्वैतचिन्ताप्रतिष्ठापको भवति श्रीशङ्कराचार्यः। सः गुरुकुले वसन् सतीर्थ्यैः सह भिक्षार्थम् अटन् आसीत्। एकस्मिन् दिने कस्यचित् ब्राह्मणस्य गृहं प्रविवेश। तत्रत्यं दारिद्र्यं विज्ञाय तन्निवारणाय ऐश्वर्यदेवतां स्तवेनैकेन संस्तुतवान् ।

क. अद्वैतचिन्ताप्रतिष्ठापकः कः ?

ख. श्रीशङ्कराचार्यः कैः सह भिक्षार्थम् अटन् आसीत् ?

ग. लक्ष्मी इत्यर्थे प्रयुक्तं पदं लिखत ।

घ. रेखाङ्कितपदस्य पदच्छेदं लिखत ।

ङ. खण्डिकातः ल्यबन्तम् अव्ययं चित्वा लिखत ।

**XIV. प्रादेशिकभाषया विवर्तयत ।** (1x4=4)

भारतीयानां सर्वस्वभूता संस्कृतभाषा विदेशेष्वपि नितरां प्रसृता वर्तते। बहवो विदेशीयाः भारतम् आगत्य संस्कृतभाषां पठित्वा तां प्रचारयन्तः विश्वप्रसिद्धाः पण्डिताश्च अभवन् । तेषु प्रसिद्धः भवति अर्नोस् पातिरिः। संस्कृतभाषाप्रचारणे तस्य योगदानं सुविदितमेव ।

*** *** *** *** ***